International Journal of Enhanced Research in Educational Development (IJERED)
ISSN: 2320-8708, Vol. 5 Issue 2, Mar-Apr, 2017, Impact Factor 1.554

# सांख्यनये अचेतनस्य स्वतःप्रवृत्तिप्रसङ्गः – एका समीक्षा

Debalina Chatterjee

Assistant Professor, Burdwan Raj College

सांख्यनये ईश्वरस्य अस्तित्वं स्वीकृतं न वेत्यस्मिन् विषये मतान्तरं दृश्यते। विषयेऽस्मिन् या मूलीभूता युक्तिः सा भवति अचेतनस्ये स्वतःप्रवृत्तिः सम्भवति न वेति।सांख्यशास्त्रेअचेतनस्य स्वतःप्रवृत्तिप्रसङ्गेःपुष्कला चर्चा परिदृश्यते। सांख्यकारिकाधारायां ईश्वरकृष्णादयः आचार्याः अचेतनस्य स्वतःप्रवृत्तिः सम्भवतीति युक्तिममाधारीकृत्य जगतसर्जने ईश्वरस्य निमित्रकाराणत्वं निराकृतम्। सांख्यसूत्रधारायां तु अचेतनस्य स्वतःप्रवृत्तिःन सम्भवति इति सयुक्तिकं चिन्तनं प्रतिपादितम्। प्रवन्धस्यास्य प्रथमे भागे ईश्वरकृष्णादीनां सांख्यकारिकाधारास्थितानां दार्शनिकानां मतं विशदीकृतं,द्वितीये भागे च व्याख्यातं सांख्यसूत्रधारान्तर्भूक्तानां विज्ञानभिक्षुरादीनां सांख्यदार्शनिकानां मतम्।

**सांख्यकारिकायाम् अचेतनस्य स्वतःप्रवृत्तिप्रसङ्गः**

सांख्यकारिकायाम् ईश्वरकृष्णेन ईश्वरः परमात्मा वेति शब्दः कुत्रापि नोच्चारितः। जगतो निमित्तोपादानकारणत्वनिर्णयावसरे अपि तेन ईश्वरस्योल्लेखं न कृतम्। तन्मतेन त्रिगुणात्मिका प्रकृतिरेव जगत्कारणम्, तस्याः परिणामित्वात्- ‘इत्येष प्रकृतिकृतो महदादिविशेषभूतपर्यन्तः’।[1] तन्मतेन जगत्सर्जनायां चेतनस्य पुरुषस्य नास्ति काऽपि भूमिका,तस्य पुरुषस्य अपरिणामित्वात्। गोवत्सस्यपरिपालनार्थम् यथा अचेतनस्य दुग्धस्य प्रवृत्तिर्भवति तथैव पुरुषस्य भोगापवर्गाय अचेतना प्रकृतिः प्रवर्तते इति ईश्वरकृष्णस्य मतम्-

“वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।

[1]सांख्यकारिका,56

पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य।।"[2]

अत्रेदं स्पष्टतया दृश्यते यद् आचार्यः ईश्वरकृष्णः अचेतनस्य स्वतःप्रवृत्तिः स्वीकयेति।

विंशतिकारिकायां तु तेनोक्तं यत्–

"तस्मात तत्संयोगादचेतनं चेतनावदिव लिङ्गम्।"[3]

अस्याः कारिकायाः व्याख्यायां माठराचार्येनापि त्रवमुक्तं यत्

"तेन पुरुषेण यः संयोगस्तस्मादचेतनं चेतनावदिव भवति।

यथाग्नि संयोगाल्लोहमणिरित्युच्यते।।"[4]

**सांख्यतत्त्वकौमुद्याम् अचेतनस्य स्वतःप्रवृत्तिप्रसङ्गः**

ईश्वरकृष्णमनुस्मृत्य वाचस्पतिमिश्रेणापि अचेतनायाः प्रकृतेः स्वतःप्रवृत्तिः स्वीकृताः। 'वत्सविवृद्धिनिमित्तं…'(सां.का.,57)इति कारिकायाः व्याख्यायां तेनोक्तं यत्-"दृष्टमचेतनमपि प्रयोजनम्प्रति प्रवर्तमानम्, यथा वत्सविवृद्ध्यर्थं क्षीरमचेतनं प्रवर्तते। एवम्प्रकृतिरचेतनाऽपि पुरुषविमोक्षणाय प्रवर्तिष्यते"।[5]

माठरवृत्तौ अपि अचतेनस्य स्वतःप्रवृत्तिः स्वीकृता। तत्र स्पष्टतया उद्घोषितं यत् –"ननु च सचेतनस्य बुद्धिपूर्विका प्रवृत्तिर्भवति, प्रधानस्याचेतनत्वात् कथं लोकत्रये पुरुषं विषयैः संयोज्य ध्यानेन विप्रमोच्य निवर्तेत। कथं एकविधा प्रवृत्तिः। नायंनियमः, अचेतनानामपि लोके प्रवृत्तिदर्शनात्।" (माठरवृत्तिः, सांख्यकारिक, 57)

**सांख्यसूत्रधारायाम् अचेतनस्य स्वतःप्रवृत्तिप्रसंङ्गः**

प्रसङ्गेऽस्मिन् महर्षिकपिलेन सूत्रितं यत्-

१) अचेतनत्वेऽपि क्षीरवच्चेष्टितं प्रधानस्य(सां.सू.,3/59)

२) कर्मवत् दृष्टेर्वा कालादेः(सां.सू.,3/60)

---

[2]सांख्यकारिका,57

[3]सांख्यकारिका,20

[4]माठरवृत्तिः, सांख्यकारिका,20

[5]तत्वकौमुदी, सांख्यकारिका,57

सांख्यसूत्रवृत्तौ अनिरुद्धेन पुरुषार्थसाधनाय अचेतनायाः प्रकृतेः प्रवृत्तिः स्वीकृता। वत्सविवृद्ध्यर्थम् अचेतनस्य क्षीरस्य प्रवृत्तिम् उदाहरणत्वेन प्रदर्श्य तेनोक्तं यत् –"यथा क्षीरमचेतनं वत्सार्थं प्रवर्तते, तथा प्रधानार्थं पुरुषार्थं प्रवर्तते"।[6]'विमुक्तमोक्षार्थं वा प्रधानस्य',(सां.सू.,2/1) इति सूत्रस्य वृत्तौ तेन अचेतनस्य प्रवृत्तौ नवीनमुदाहरणमेकं संयोजितम्। तन्मतेन यथा सम्भवति अचेतनानां वृक्षाणां फलादिद्वारेण प्रवृत्तिः तथैव प्रयोजकं विहाय अचेतनायाः प्रकृतेः प्रवृत्तिः सम्भवति। वृक्षात् फलोद्गमनं यथा स्वतः भवति तथैव अचेतनायाः प्रकृतेः प्रवृत्तिः स्वभावतः एव भवति, तत्र नास्ति कस्यापि चेतनस्य आवश्यकता इति अनिरुद्धस्य मतम् – "अचेतनायाः प्रकृतेः कथं प्रवृत्तिः?दृष्टा अचेतनानामपि वृक्षाणां फलादिद्वारेण प्रवृत्तिरिति"।[7]

विज्ञानभिक्षुणा अपि क्षीरवद् अचेतनायाः प्रवृत्तिः स्वीकृता- "यथा क्षीरं पुरुषप्रयत्नेनैरपेक्ष्येण स्वयमेव दधिरूपेण परिणमते, एवमचेतनत्वेऽपि परप्रयत्नं विनापि महदादिरूपपरिणामः प्रधानस्य भवतीत्यर्थः"।[8]अतएव वत्सस्य परिपालनार्थं यथा क्षीरं प्रवर्तते तथैव पुरुषविमोक्षार्थम् अचेतना प्रकृतिः जगत्सर्जनायां प्रवर्तते। तस्याः परिणामे अन्यस्य चेतनस्य अधिष्ठातृत्वरूपेण आवश्यकता नास्ति। भाष्यसारे महादेवेन अपि क्षीरस्य प्रवृत्तिम् उदाहरणतया प्रदर्श्य अचेतनायाः प्रकृतेः प्रवृत्तिः उपपादिता। नागेशभट्टोऽपि तत्प्रणीते भाष्यसारे विज्ञानभिक्षुमनुस्मृत्य अचेतनायाः प्रकृतेः स्वतःप्रवृत्तिं स्वीकरोत–"नन्वचेतनस्य स्वतः स्रष्टृत्वमनुपपन्नम्, रथादौ परत्वेनैव चेष्टादर्शनादिति तत्राह – अचेतनत्व इति। यथा क्षीरं द्रव्यान्तरसंयोगेन पुरुषयत्नं विनैव स्वत एव दधिरूपेण परिणमते, एवं महदादिरूपेण प्रधानं परिणमत इत्यर्थः।"[9] अतः सांख्यसूत्रे तस्य वृत्तौ भाष्यव्याख्यानेषु च अचेतनायाः प्रकृतेः स्वतःप्रवृत्तिः स्वीकृता।

---

[6]सांख्यसूत्रवृत्तिः, सांख्यसूत्रम्,3/59

[7]सांख्यसूत्रवृत्तिः, सांख्यसूत्रम्, 2/1

[8]सांख्यप्रवचनभाष्यम्, सांख्यसूत्रम्, 3/59

[9]भाष्यसारः, सांख्यसूत्रम्, 3/59

सर्वदर्शनसंग्रहे सांख्यमतसंग्रहावसरे माधवाचार्यः ईश्वरकृष्णवाचस्पतिमिश्रादीनाम् अनुस्मृत्य उद्घोषयति यत्–“अचेतनस्यापि प्रधानस्य प्रयोजनवशेन प्रवृत्त्युपपत्तेः। दृष्टञ्चाचेतनं चेतनाधिष्ठितं पुरुषार्थाय प्रवर्तमानं यथा वत्सविवृद्ध्यर्थमचेतनं क्षीरं प्रवर्तते यथा जलमचेतनं लोकोपकाराय प्रवर्तते तथा प्रकृतिरचेतनापि पुरुषविमोक्षाय प्रवत्स्यति”।[10] तन्मते प्रयोजनवशेन अचेतनस्यापि प्रवृत्तिः सम्भवति। अचेतनस्य प्रवृत्त्युपपत्तये तेन नवीनममुदाहरणमेकं प्रदत्तम्। उदाहरणमिदं भवति लोकोपकाराय अचेतनस्य जलस्य प्रवृत्तिः। लोकहिताय अचेतनस्य उदकस्य प्रवृत्तिर्यथा सम्भवति तथैव अचेतनायाः प्रकृतेः प्रवृत्तिरपि सम्भवति,नास्ति तत्र चेतनस्य अधिष्ठातृत्वकल्पनावसर इति माधवाचार्यस्य मतम्।

अनन्तरं वाचस्पतिमिश्रमनुस्मृत्य स कारुण्याद् ईश्वरस्य जगत्सर्जनायां प्रवृत्तिरिति मतं निराकरोति। तेनोक्तं यत्- “यस्तु परमेश्वरः करुणया प्रवर्तक इति परमेश्वरास्तित्ववादीनां डिण्डिमः स गर्भस्रावेण गतः। विकल्पानुपपत्तेः। स किं सृष्टेः प्राक् प्रवर्तते सृष्ट्युत्तरकालं वा। आद्ये शरीराभावेन दुःखानुत्पत्तौ जीवानां दुःखप्रहाणेच्छानुपपत्तिः। द्वितीये परस्पराश्रयप्रसङ्गः। करुणया सृष्टिः सृष्ट्या च कारुण्यमिति”।[11]परन्तु माधवाचार्येण प्रधानस्य परिणामे निर्व्यापारस्य पुरुषस्य संन्निधानस्य आवश्यकता स्वीकृता। तेन मन्यते निर्व्यापारस्य अयस्कान्तस्य संन्निधानेन यथा लौहे चाञ्चल्यमुत्पद्यते तथैव निर्व्यापारस्य पुरुषस्य सान्निध्यादेव प्रकृतिः परिणमते। प्रकृतिपुरुषयोः सम्बन्धः पङ्ग्वन्धवत् परपरस्परापेक्षानिबन्धनः। तेन गीयते यत्-“तस्मादचेतनस्यापि चेतनानधिष्ठितस्य महदादिरूपेण परिणामः पुरुषार्थप्रयुक्तः प्रधानपुरुषसंयोगनिमित्तः। यथा निर्व्यापारस्यापि अयस्कान्तस्य संन्निधानेन लोहस्य व्यापारस्तथा निर्व्यापारस्य पुरुषस्य संन्निधानेन प्रधानव्यापारः युज्यते”।[12]

अचेतनस्य प्रवृत्तिः सम्भवतीति प्रतिपादयितुम् अनिरुद्धेन वृक्षस्य उदाहरणं प्रदत्तम्।तेन निगदितं यद्–“अचेतनानामपि वृक्षाणां फलादिद्वारेण यथा स्वतःप्रवृत्तिः दृश्यते तथैव अचेतनत्वेऽपि प्रकृतेः प्रवृत्तिः सम्भवति”।[13]परन्तु वृक्षाणां चैतन्यमयत्वं सुविदितम्।

---

[10]सर्वदर्शनसंग्रहः, उमाशंकरशर्मा, चौखाम्बा विद्याभवन, पृ. 648

[11]सर्वदर्शनसंग्रहः, उमाशंकरशर्मा, चौखाम्बा विद्याभवन, पृ. 645

[12]सर्वदर्शनसंग्रहः, उमाशंकरशर्मा, चौखाम्बा विद्याभवन, पृ. 645

[13]सांख्यसूत्रवृत्तिः, सांख्यसूत्रम्, 2/2

वैज्ञानिकाः अपि वृक्षाणां चैतन्यमयत्वं स्वीकुर्वन्ति। महाभारते शान्तिपर्वणि व्यासदेवेन वृक्षाणां चैतन्यमयत्वं सयुक्तिकतया प्रख्यापितम्। तत्र तेनोक्तं यत् –

"घनानामपि वृक्षाणामाकाशोऽस्ति न संशयः।
तेषां पुष्पफलव्यक्तिर्नित्यं समुत्पद्यते।।

ऊष्मातो म्लायते पर्णं त्वक् फलं पुष्पमेव च।
म्लायते शीर्यते चापि स्पर्शस्तेनात्र विद्यते।।
वाय्वग्न्यशनिघोषैः फलं पुष्पं विशीर्यते।
श्रोत्रेण गृह्यते शब्दस्तस्माच्छृण्वन्ति पादपाः।।
वल्ली वेष्टयते वृक्षं सर्वतश्चैव गच्छति।
नह्यदृष्टेश्च मार्गोऽस्ति तस्मात् पश्यन्ति पादपाः।।
पुण्यापुण्यैस्तथा गन्धैर्धूपैश्च विविधैरपि।
अरोगाः पुष्पिताः सन्ति तस्माजिघ्रन्ति पादपाः।।
पादैः सलिलपानाच्च व्याधीनां चापि दर्शनात्।
वक्त्रेणोत्पलनालेन यथोर्ध्वं जलमाददेत्।
तथा पवनसंयुक्तः पादैः पिवति पादपः।।
सुखदुःखयोश्च ग्रहणाच्छिन्नस्य च विरोहणात्।
जीवं पश्यामि वृक्षाणामचैतन्यं न विद्यते।।
तेन जलमादत्तं जरयत्यग्निमारुतौ।
आहारपरिणामाच्च स्नेह बुद्धिश्च जायते।।"(महाभारतम्,12/184/10-18)

अपि च सूक्ष्मतया अनुधावनेन दृश्यते यत् दुग्धस्य दधिरूपपरिणामोऽपि स्वतः न भवति, तत्रापि कस्यापि अन्यस्य भूमिका वर्तते। शंकराचार्यस्य मतं संगृह्य माधवाचार्येण सर्वदर्शनसंग्रहे स्पष्टतया उक्तं यत् –"क्षीरादिकमचेतनं चेतनानधिष्ठितमेव वत्सविवृद्ध्यर्थं प्रवर्तते इति। नैतद्रमणीयम्। बुद्धिविशेषशालिनः परमेश्वरस्य तत्राप्यधिष्ठातृत्वावगमात्। न च परमेश्वरस्य करुणया प्रवृत्यङ्गीकारे प्रागुक्तविकल्पावसरः। सृष्टेः प्राणिनां दुःखासम्बन्धासम्भवेऽपि तन्निदान-अदृष्टसम्बन्धसम्भवेन तत्प्रहाणेच्छया प्रवृत्त्युपपत्तेः"।[14]

---

[14]सर्वदर्शनसंग्रहः, उमाशंकरशर्मा, चौखाम्बा विद्याभवन, पृ. 868

प्रश्नो जायते अचेतनस्य स्वतःप्रवृत्तिः यदि सम्भवति तर्हि मृतधेनोः दुग्धक्षरणं कथं न सम्भवति? केवलं लोकस्योपकाराय न तु जलस्य गतिः, जलस्य या गतिर्दृश्यते तत् तस्य निम्नाभिगमनस्वभावात्। लोकोपकाराय यदि जलस्य गतिः स्यात्तर्हि कस्मिंश्चित् मरुप्रदेशे कथं न दृश्यते जलस्य प्रवहनम्। वृक्षात् फलस्योद्गमनेऽपि चेतनस्यावश्यकता दृश्यते। मधुकरेण परागसंयोगं यदि न क्रियते तर्हि न सम्भवति फलस्योत्पत्तिः। अतः अचेतनस्य प्रवृत्तौ अवश्यमेव विद्यते चेतनस्यावश्यकता। वस्तुतः अचेतनस्य स्वतःप्रवृत्तिर्न सम्भवति इत्यस्माकं विचारः।